"सर्व्वैरेभिः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः" ॥ * ॥
असाध्यलक्षणं ॥
अपस्मारः स चासाध्यो यः क्षीणस्यानवश्च यः ॥*॥
अरिष्टलक्षणं ।
"प्रस्फुरन्तं सुबह्वशः क्षीणं प्रचलितभ्रुवं ।
नेत्राभ्याञ्च विकुर्व्वाणमपस्मारो विनाशयेत्" ॥*॥
तस्य वेगकालः ।
"पक्षाद्वा द्वादशाहाद्वा मासाद्वा कुपिता मलाः ।
अपस्माराय कुर्व्वन्ति वेगं किञ्चिदथान्तरं ॥
देवे वर्षत्यपि यथा भूमौ बीजानि कानिचित् ।
शरदि प्रतिरोहन्ति तथा व्याधिसमुच्चयाः" ॥
इति माधवकरः ॥ * ॥ तस्य चिकित्सा । यथा,—
"तैलेन लशुनः सेव्यः पयसा च शतावरी ।
ब्राह्मीरसश्च मधुना सर्व्वापस्मारभेषजं ॥ * ॥
चूर्णैः सिद्धार्थकादीनां भक्षितैरथवापि तैः ।
गोमूत्रपिष्टैः सर्व्वाङ्गलेपैः शाम्यत्यपस्मृतिः" ॥
सिद्धार्थकादिः उन्मादोक्तः ॥ * ॥
"शिग्रुकट्वङ्गकिणिहीनिम्बत्वग्रसपाचितं ।
चतुर्गुणे गवां मूत्रे तैलमभ्यङ्गने हितं" ॥
कट्वङ्गः शोनापाठा । किणिही चिरिचिरा ॥*॥
"निर्गुण्डीभववन्दाकनावनस्य प्रयोगतः ।
उपैति सहसा नाशमपस्मारो महागदः ॥ * ॥
मनोह्वा तार्क्ष्यविष्ठा वा शकृत् पारावतस्य च ।
अञ्जनाद्धन्त्यपस्मारमुन्मादञ्च विशेषतः" ॥
मनोह्वा मनःशिला । तार्क्ष्यो गरुड़ः । शकृत् विष्ठा ॥ * ॥
"यः खादेत् क्षीरभक्ताशी माक्षिकेण वचारजः ।
अपस्मारं महाघोरं चिरोत्थं स जयेद्ध्रुवं" ॥
वचा घुरवच् ॥ * ॥
"कुष्माण्डकफलोत्थेन रसेन परिपेषितं ।
अपस्मारविनाशाय यष्ट्याह्वं च पिबेत् त्र्यहं" ॥
त्र्यहमिति एतस्य पानाद्दिवसत्रयेणैवापस्मारोपशमो भवतीत्यभिप्रायः ॥ * ॥
"ब्राह्मीरसवचाकुष्ठशङ्खपुष्पीशृतं घृतं ।
पुराणं स्यादपस्मारोन्मादग्रहहरं परं" ॥
एतस्य प्रक्रिया । पुराणं गोघृतं प्रस्थमितं वचाकुष्ठशङ्खपुष्पीणां समुदितानां कुड़वमितानां कल्केन प्रस्थमितब्राह्मीरसमिश्रेण पचेत् । ब्राह्मीघृतं ॥ * ॥
"कुष्माण्डकरसे सर्पिरष्टादशगुणे पचेत् ।
यष्ट्याह्वकल्कं तत्पानमपस्मारविनाशनं" ॥
कुष्माण्डकघृतं ॥ * ॥
"द्वौ कीटमेषौ विधिवदानीय रविवासरे ।
कण्ठे भुजे वा संधार्य्य जयेदुग्रामपस्मृतिं" ॥
अयन्तु कीटो नदीतीरे सिकतामध्ये तिष्ठति ॥*॥
"शिग्रुकुष्ठजलाजाजीलशुनव्योषहिङ्गुभिः ।
वस्तमूत्रे शृतं तैलं नावनं स्यादपस्मृतौ" ॥
जलं बालकं । अजाजी जीरकः । वस्तः छागः ।
नावनं नस्यं ॥ * ॥ इत्यपस्माराधिकारः । इति भावप्रकाशः ॥

अपहारः, पुं, (अप + हृ + भावे घञ् ।) अपचयः । हानिः । इत्यमरः ॥ अपहरणं । चौर्य्यं । संगोपनं । धनस्वाम्यनुपयोगित्वम् । इति दायभागः ॥ (विनाशः ।
"कर्णनासापहारेण भगिनी मे विरूपिता" ।
इति रामायणे । स्तेयं । यद्वान्यापहारादिकं कर्म्म द्रव्यस्वामिसमक्षं बलात्कृतं तत्साहसं स्यात् । इति कल्लूकभट्टः । निह्नवः । "कथं वा आत्मनः अपहारं करोमि" । इति शाकुन्तले ।)

अपहारकः, त्रि, (अप + हृ + ण्वुल् ।) अपहारी । अपहरणकर्त्ता । यथा,—
"परापवादनिरतः परद्रव्यापहारकः" ।
इति पुराणं ॥
("द्विविधान् तस्करान् विद्यात् परद्रव्यापहारकान् प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः" ।
"अन्नहर्त्तामयाविलं मौक्यं वागपहारकः ।
वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः" ॥
इति मनुः । चौरः ।
"योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते ।
स पापकृत्तमो लोके स्तेन आत्मापहारकः" ।
इति मनुः ।)

अपहासः, पुं, (अप + हस् + भावे घञ् ।) अकारणहास्यं । इति हेमचन्द्रः ॥

अपह्नवः, पुं, (अप + ह्नु + भावे अप् ।) अपलापः । स्नेहः । इति मेदिनी ॥
("ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम्" ॥
इति मनुः ।)

अपह्नुतिः, स्त्री, (अप + ह्नु + भावे क्तिन् ।) अपलापः । अपह्नवः । इति शब्दरत्नावली ॥ उपमेयासत्यकरणपूर्व्वकोपमानसत्यतास्थापिकालङ्कृतिः । तस्या लक्षणं ।
"प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः" ।
उदाहरणं ।
"अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये ।
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ॥
अमुष्येयं मन्ये विगलदमृतस्यन्दिशिशिरे ।
रतिश्रान्ता शेते रजनिरमणी गाढ़मुरसि" ॥
इति काव्यप्रकाशः ॥
("प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः ।
गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन ॥
यदि श्लेषेणान्यथा वान्यथयेत् साप्यपह्नुतिः" ।
इति साहित्यदर्पणे ।)

अपांनाथः, पुं, (अपां नाथः अलुक्समासः ।) समुद्रः । इति राजनिर्घण्टः ॥

अपांनिधिः, पुं, (निधीयतेऽत्र, नि + धा + अधिकरणे किः, अपां निधिः आधारः ।) समुद्रः । वारांनिधिः इति दर्शनात् ॥

अपांपतिः, पुं, (अपां पतिः, अलुक्समासः ।) समुद्रः । इत्यमरः ॥ वरुणः । अप्पतिरित्यमरटीकोक्तत्वात् ॥

अपांपित्तं, क्ली, (अपां पित्तमिव तदुत्पन्नत्वात् तस्य पित्तत्वं, अलुक्समासः ।) अग्निः । इति शब्दरत्नावली ॥ चित्रकवृक्षः । वह्निसंज्ञक इत्यमरटीकोक्तत्वात् ॥

अपाक्, [च्] त्रि, (अप + अञ्च + क्विन्, नलोपः ।) दक्षिणदिग्भववस्तु । तत्पर्य्यायः । अपाचीनं २ । इति हेमचन्द्रः ॥

अपाकः, पुं, (पच + भावे घञ्, ततो नञ्समासः ।) पाकाभावः । अजीर्णता । यथा,—
"अङ्गमर्द्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः ।
अपाकः शून्यताङ्गानामामवातस्य लक्षणं" ॥
इति माधवकरः ॥ पाकाभावविशिष्टे त्रि । यथा,—
"गात्रप्रदेशे क्वचिदेव दोषाः
संमूर्च्छिता मांसमसृक् प्रदूष्य ।
वृत्तं स्थिरं मन्दरुजं महान्त-
मनल्पमूलं चिरवृद्ध्यपाकं" ॥
इति माधवकरः ॥

अपाकशाकं, क्ली, (न पच्यते, पच् + घञ्, नञ्समासः, अपाकः शाको यस्य तत् ।) आर्द्रकं । इति राजनिर्घण्टः ॥

अपाङ्गः, पुं, (अपाञ्चति वक्रं गच्छति चक्षुर्यत्र, अप + अञ्च + अधिकरणे घञ् ।) नेत्रयोरन्तः । चक्षुःकोणः ।
("चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं" ।
इति शाकुन्तले । "कुवलयदृशां लोललोलैरपाङ्गैः" ।
इति शान्तिशतके ।) तिलकः । इत्यमरः ॥ अङ्गहीने त्रि । इति मेदिनी ॥

अपाङ्गकः, पुं, (अपकृष्टमङ्गं यस्य समासान्तः कः ।) अपामार्गवृक्षः । इति शब्दरत्नावली ॥ आपां इति भाषा । अङ्गहीने त्रि ॥

अपाङ्गदर्शनं, क्ली, (अपाङ्गेन नेत्रप्रान्तेन दर्शनं तृतीयातत्पुरुषः ।) कटाक्षः । इति हेमचन्द्रः ॥

अपाची, स्त्री, (अप + अञ्च + क्विन्, स्त्रियां ङीप् ।) दक्षिणदिक् । इति हलायुधः ॥

अपाचीनं, त्रि, (अपाच्यां दक्षिणस्यां दिशि भवं, अपाच् खः तस्य ईनं ।) अपाग्यं । दक्षिणदिग्भववस्तु । विपर्य्यस्तं । विपरीतं । इति विश्वमेदिन्यौ ॥

अपाच्यं, त्रि, दक्षिणदिग्भववस्तु । अपाची दक्षिणदिक् ततो भवार्थे यप्रत्ययः ॥ पचनायोग्यं । पचधातोः कर्म्मणि ण्यति पाच्यं पश्चान्नञ्समासः ॥

अपाटवं, क्ली, (पटोर्भावः पटु + भावे अण्, नास्ति पाटवं पटुता यत्र तत् ।) रोगः । इति हेमचन्द्रः ॥ अपटुता । जड़ता । पटोर्भावः पाटवं ततो नञ्समासः ॥

अपात्रं, क्ली, (कुत्सितं पात्रं अप्राशस्त्ये नञ्समासः ।) कुपात्रं । असत्पात्रं । यथा । "अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे" । इति मलमासतत्त्वं ॥ (योग्यताहीनं । निन्दितं । विद्यातपोहीनं । दानादियोग्यताहीनं ।
"विद्येव कन्यका मोहादपात्रे प्रतिपादिता ।
यशसे न न धर्म्माय जायेतानुशयाय तु" ॥
इति कथासरित्सागरे ।)

अपात्रीकरणं, क्ली, (अनपात्रं अपात्रं कुत्सितपात्रं क्रियतेऽनेन, अपात्र + च्वि + कृ + करणे ल्युट् ।) नवविधपापमध्ये पापविशेषः । तच्चतुर्विधं ।